यादिक
२-मार्च

अ. नं. १

६

[illegible]

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रीगणेशायनमः ॥ हरिः ॐ हिरण्यवर्णां हि

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(२)

॥श्रीः॥मध्येवर्त्तुलमंडलमादित्याय॥आग्नेय्यांचतुरस्त्रंसोमाय॥
॥दक्षिणेत्रिकोणमंगारकाय॥ईशान्यांबाणाकारंबुधाय॥
॥उत्तरेदीर्घचतुरस्त्रंबृहस्पतये॥प्राच्यांपंचकोणंशुक्राय॥१॥
॥पश्चिमेधनुराकारंशनैश्चराय॥नैरृत्यांशूर्पाकारंराहवे॥वाय॥
॥व्यांध्वजाकारंकेतवे॥शुक्रार्कौप्राङ्मुखौसौम्यगुरूसौम्या॥
॥बुदङ्मुखौ॥प्रत्यङ्मुखःशनिःसोमःशेषादक्षिणतोमुखाः॥स॥
॥वितारंअग्निंईश्वरं।सोमंअपउमां।अंगारकंभूमिंस्कंदं।बु॥
॥धंविष्णुंनारायणं।बृहस्पतिमिंद्रंब्रह्मणस्पतिं।शुक्रमिंद्राणीं॥
॥शक्रं॥शनैश्चरंप्रजापतिंयमं।राहुंसर्पान्कालं।केतुंब्रह्मा॥
॥णंचित्रगुप्तं॥

(2)

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

श्रीगणेशायनमः॥ श्रीगुरुभ्योनमः॥ श्रीसरस्वत्यै
नमः॥ सजयतिसिंधुरवदनोदेवोयस्यादपंकजस्म
रणंवासरमणिरिवतमसांराशिन्नाशयतिविघ्ना
नां॥१॥ वक्रतुंडमहाकायसूर्यकोटिसमप्रभ॥ अ
विघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा॥२॥ अद्येत्यादि
तेषांराज्यांगानांचिरकालममाधीनत्वसिद्धिपूर्वकलक्ष्मीवि
वर्धनद्वाराशत्रुनाशार्थंविजयादशमीप्राधान्येनविहितंय
थाज्ञानेनछत्रादीनांयथामिलितोपद्रव्यैःपूजनमहंकरिष्ये
॥यथांबुदश्छादयतिशिवायमांवसुंधरां॥ तथाछादयरा
जानंविजयारोग्यवृद्धये॥ इतिछत्रस्य॥ शशांककरसं
काशंक्षीरपिंगटपांडुर॥ प्रोत्सारयाशुदुरितंचामरामर
दुर्लभं॥ चामरस्य॥ गंधर्वकुलजातस्त्वंमाभूयात्कुलभू
षकः॥ ब्रह्मणःसत्यवाक्येनसोमस्यवरुणस्यच॥ प्रभावा
च्चहुताशस्यवर्द्धयस्वतुरंगमान्॥ ब्रजाश्वतोगतिक्षिप्रं
तच्चपापंभवेत्तव॥ निःकृतोयादिवाछिन्नोयुद्धाध्वनितुरं
गम॥ रिपून्विजित्यसमरेभर्त्रासहसुखीभव॥ इत्यश्व
स्य॥ असिर्विशसनःखड्गस्तीक्ष्णधारोदुरासदः॥ श्रीगर्भो
विजयश्चैवधर्मधारस्तथैवच॥ एतानितवनामानिस्वयमु
क्तानिवेधसा॥ पितापितामहोदेवःस्त्वंमांपालयसर्व
दा॥ नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रःकृशोदरः॥ भाव
शुद्धोमर्षणश्चअतितेजास्तथैवच॥ इयंमेनधृताक्षोणी
हतश्चमहिषासुरः॥ तीक्ष्णधारायशुद्धायतस्मैखड्गा
यतेनमः॥ इतिखड्गस्य॥ रक्षांगानिगजान्रक्षरक्ष
वाजिधनानिच॥ ममदेहंसदारक्षकट्टारकनमोस्तुते॥ इ
तिकट्टारकस्य॥ सर्वायुधमहामात्रसर्वदेवारिसूदन॥
चापमांसमरेरक्षसाकंशरवरैरिह॥ धृतंरुक्मेनरक्षा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(५)

र्थं संहारायहरेणच॥ त्रयीमूर्त्तिगतंदेवधनुरस्त्रंनमाम्य
हं॥ इतिधनुषः॥ शर्मप्रदस्त्वंसमरेचर्मसैन्येयशोद्य
मे॥ रक्षमांरक्षणीयोहंतापनीयनमोस्तुते॥ इतिच
र्मस्य॥ प्रोत्सारणायदुष्टानांसाधुसंरक्षणायच॥ ब्रह्म
णानिर्मितश्चासिव्यवहारप्रसिद्धये॥ यशोदेहिसुखं
देहिजयदोभवभूपतेः॥ ताडयस्वारिपून्सर्वान्हेमदं
डनमोस्तुते॥ इतिहेमदंडस्य॥ शिबिकेत्वंसपत्नानां
घोराभयविवर्द्धनी॥ रक्षमांसमरेदेवीशिबिकायैनमो
नमः॥ इतिशिबिकायाः॥ अथशमीपूजनं॥ अद्ये॰र्थं म
मसर्वत्रविजयप्राप्तिपूर्वकशत्रुनाशनार्थंशमीपूजनं
क॰ अमंगलानांशमनीशमनीदुष्कृतस्यच॥ दुःस्वप्ननाशिनीधन्यांप्रपद्येहंशमींशुभां॥ शमीशमयतेपापंशमी
लोहितकंटका॥ धारिण्यर्जुनबाणानांरामस्यप्रिय
वादिनी॥ करिष्यमाणयात्रायांयथाकालंसुखंमया॥
तत्रानिर्विघ्नकर्त्रीत्वंभवश्रीरामपूजिते॥ शम्यभावेअ
श्मंतकपूजाकार्या॥ तत्रमंत्रः॥ अश्मंतकमहावृक्षमहा
दोषनिवारण॥ इष्टानांदर्शनंदेहिशत्रूणांचविनाशनं॥

श्रीः॥ आसत्येन॰नू॥ भूर्भुवःसुवःकलिंगदेशोद्भवका
श्यपसगोत्रसूर्यइहागच्छ॰॥ आप्याय॰धे॥ भूर्भुवः
सुवः यमुनातीरोद्भवआत्रेयसगोत्रसोमइ॰॥ अग्नि
मू॰त्ति॥ भूर्भुवःसुवःअवंतिकासमुद्भवभारद्वाजसगो
त्रअंगारकइ॰॥ उद्बुध्य॰तं भूर्भुवःसुवःमगधदेशो
द्भवआत्रेयसगोत्रबुधइ॰ बृहस्पते॰त्रं भूर्भुवःसुवः
सिंधुदेशोद्भवआंगिरसगोत्रबृहस्पतेइ॰॥ शुक्रंते

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5)

अन्य० स्तु भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवसगो
त्रशुक्र इ० शंनोदे० नः भूर्भुवः स्वः सौराष्ट्रदेशोद्भव
काश्यपसगोत्रशनैश्चर इ० कयानश्चि० ता भूर्भुवः
स्वः राठिनापुरोद्भव पैठिनसिस्सगोत्र राहो इहाग
छ०॥ केतुं कृण्व० ध्याः भूर्भुवः स्वः अंतर्वेदिसमुद्भवजै
मिनिसगोत्र केतो इ०॥ त्र्यंबकं० गौरीमि० यदक्रंदः
सहस्रशी० ब्रह्मादे० सजोषा० इमं यम० कार्षिर० चित्रा
वसो० इत्याधिदेवताः॥ अग्निं दू० अप्सु मे० स्योना पृथि०
इदं विष्णु० इंद्रं वो० इंद्राणी० प्रजापते० आयं गौः० ब्रह्म
ज० इति प्रत्यधिदेवताः॥ अथ वाग्न्यादयो देवताः धि
ईश्वरादयः प्रत्यधि देवताः॥ गणा० नम० वायो शु०
० घृतं घृ० यावाके० वास्तोष्पते० क्षेत्रस्य इति क्रतुस्सं
रक्षकदेवताः॥ त्रातार० बह्नो अग्ने० इमं यम० असु
न्वंत० तत्वायामि० आ नो नि० संतपाया० रसि० अभि
त्वा० इति लोकपालाः॥ अथ पूर्णाहुति मंत्राः॥ समु
द्रादू० वयं नाम० त्रिरस्य० मूर्धानं० पुनस्त्वा० पूर्णा द०
सप्त ते अ० तेन॥ २॥ सुरास्त्वाम० भ्वरा ४॥ वासुदेवो
ज० विभुः॥ प्रद्युम्न० यते॥ आखंडलो० स्तथा॥ वरुणः प
व० शिवः। ब्रह्मणा० सदा॥ कीर्तिर्लक्ष्मी धृ० मतिः॥ बुद्धि
र्ज० तरः॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः॥
आदित्यश्चं० जाः॥ ग्रहास्त्वामभिषिंचंतु राहुः० ताः॥
देवदा० गाः॥ ऋषयो० वृच॥ देवपत्न्यो० गणाः॥ अ
स्त्राणि० निच॥ ओषधो० ये॥ सरितः० निदाः॥ एता
स्त्वा० सर्वकामार्थसिद्धये॥ ३॥

(6) अलंकृत्याग्निमाधायपालाशीःसमिधंततः ४

सा
संकल्पोध्यानमाधानंसमूहनपरिस्तरे।।पात्राणिदर्वयेद्
र्वीप्रोक्षणीमाज्यभाजनं ।।३।।समेक्षणञ्चरुस्थाली
र्पाजिनमुलूखलं ।।मुसलंसमिधोवेषंदर्भान्मायपवि
त्रकं।।शूर्पेनिधायचतुरोव्रीहिमुष्टिस्तुनिर्वपेत् ।।संस्कृ
त्यप्रोक्षणीस्तूष्णींहविषःप्रोक्षणंभवेत् ।।कृत्वोत्ताना
निपात्राणिपात्रोणांप्रोक्षणंततः।।चर्मण्युलूखलंकृत्वा
व्रीहिनोप्यावहत्यच।।निष्पूयेवंत्रिवारंस्यात्प्रक्षाल्यश्र
पयेच्चरुं।।दर्वीनिष्टप्यसंमृज्यसंस्कृत्याज्यंततःपरं।।अ
भि[illegible]घार्योदगुद्वास्यपरिषिंचेद्यथानलं।।अग्नयेजुहुया
त्त्राग्नयेस्विष्टकृतेततः।।समस्यव्याहृतीर्हुत्वापरिषिंचेद्यथा
नदं।।[illegible]पस्त्वाभूविभवेयेहुत्वातथा।।आपूर्विकेण
पूजनं
तंत्रेणस्थालीपाकस्यवैकृतिः।। ।।
मन्वाद्यास्तिथीमधोस्तिथिरबीजेशुचौहिरतिथिर्ज्येष्ठे
स्येचतिथिस्त्विषेनवतपस्यश्चासहस्यंतिथाः।।भाद्रेग्नि
श्चसितेत्वभाक्षनभसःकृष्णेयुगाद्याःसितेगोघ्नीबाहु
लराधयोर्भदनवक्रेपाडमाघेसिते।।९।।अथाग्निना
मानि।।अतःपरंप्रवक्ष्यामिपुत्रंसप्तयेग्निना।।ब्राह्मणानांहितार्थाय
संस्कारार्थायचाग्नये।।पावकोलौकिकोह्यग्निःप्रथमःसंप्रकीर्ति
ता।।अग्निस्तुमरुतोनामगर्भाधानेविधीयते।।ततःपुंसवनेज्ञेयः
पावमान्यस्तथैवच।।सीमंतेमंगलोनामप्रबलोजातकर्मणि।।
नाम्नेलुपार्थिवोह्यग्निःप्राशनेतुशुचिस्मृतः।।सभ्योनामसचौलेतु
व्रतादेशेसमुद्भवः।।गोदानेसूर्यनामाग्निर्विवाहेयोजकस्मृतः।।
आवसथ्योभवेत्स्योवैश्वदेवेतुपावकः।।ब्रह्मातुगार्हपत्योग्निरी
श्वरोदक्षिणास्तथा।।विष्णुस्त्वाहवनीयोग्निरग्निहोत्रेत्रयोग्नयः।।
पूर्णाहुतिर्मृडोनामशांतिकेवरदस्तथा।।प्रायश्चित्तेभवेद्वीतापौ
ष्टिकेबलवर्धनः।।वश्यार्थेकामदोनामवनदाहेतुवर्धनः।।कुक्षौतु
जठरोह्यग्निःक्रव्यादोमृतभक्षणः।।देवानांहव्यवाहाग्निःपितॄणां

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

कव्यवाहनः॥सहस्रोसुराणांच पावकोलौकिकस्तथा॥लक्षहोमेवान्हि
नामकोटिहोमेहुताशनः॥वृषोत्सर्गेध्वरोनामक्रोधाग्निश्चाभिचारिके॥
समुद्रेवडवोह्यग्निःक्षयेसंवर्तकस्तथा॥उक्तमेदशमाख्यातशोचयेद्वि
क्षणस्तथा॥अविदित्वातुयोह्यग्निहोमंकुर्याद्विचक्षणः॥नतस्यतन्त्र
संस्कारनकर्मचफलंलभेत्॥पावकस्यमुखंवक्ष्येयदुक्तंपद्मयोनि
ना॥प्रमाणंचतुरस्रंतुवर्तुलंमुखमंडलं॥अग्निजिव्हाप्रमाणंतुशा
स्त्रेशःपरिकीर्तिताः॥करालीधूमिनीश्वेतालोहितामहलोहिता॥सुव
र्णापद्मरागीचसप्तजिव्हाःप्रकीर्तिताः॥करालीराक्षसान्हंतिधूमिनी
असुरांस्तथा॥श्वेतानागान्समश्नातिपिशाचांल्लोहितस्तथा॥गंध
र्वान्महलोहित्यासुवर्णीतुयक्षंतथा॥पद्मरागीतिविख्यातादिव्याजि
व्हाहुतोशाने॥अग्निवर्णादिप्रोक्ताचयेस्तुकर्मसिध्यति॥यस्तुनहोम
येन्नित्यंसगच्छेदीक्षितपदं॥आधिव्याद्पवर्णाभोस्निग्धोवैदूर्यसन्नि
भः॥पीतकृष्णनिभश्चैवलाभवर्णस्तथैवच॥हरितालनिभश्चैव
धूम्रवर्णस्तथैवच॥समायससुवर्णाभाइंद्रगोपकसन्निभः॥इंद्रा
युधस्वर्णाभाकुंकुमोहरतप्रभा॥बहुलमथनेदीप्तसमिद्धहुताश
ने॥विपुलेलेलिहानेचहोतव्यंकर्मसिध्यति॥नातिधूमातिज्वालाप्रज्वलःस
त्रैवहोमयेत्॥प्रभाविताहुयत्रैनभवाबांस्तत्रतिष्ठति॥तत्रपूर्णाहुतिंकुर्या
त्सर्वपापापनुत्तये॥अर्कःपलाशःखदिरस्त्वपामार्गोथपिप्पलः॥औदुंबर
शमीदूर्वाकुशाश्चसमिधःक्रमात्॥दर्भदूर्वाअपामार्गकुशानास्तिर्वविद्र
पितः॥कुशमूलेस्थितोब्रह्माकुशमध्येजनार्दनः॥कुशाग्रेशंकरंविद्या
त्रयोदेवाःकुशोस्थिताः॥अर्कस्तुहरतेरोगान्पालाशीकुरुतेधनं॥
खादिरीहरतेशत्रू अपामार्गस्तथैवच॥औदुंबरीवित्तकरीहस्त्य
श्वकनकंमपि॥शमीशमयतेपापंक्षिप्रंभवतिशोभनः॥दूर्वाआयुः
करीनित्यंकुशैःसर्वार्थसिद्धये॥मारिणीराक्षसीरौद्रीक्रव्यदीब्रह्म
राक्षसी॥स्थूलकेदंताकरालीचयन्त्रहस्तातथैवच॥यमाहुतीतिवि
ख्याताइत्येतेसमिधानव॥जीर्णातुविदलाह्रस्वावक्राश्चस्थूलाःकृ
शाद्विधः॥कीटदंष्ट्रातुभयदादीर्घश्चैवसुताहरेत्॥दधिकेंगु
लिप्रमाण्योदीर्घताद्वादशांगुलः॥एषाशांतिकरीनामसर्वहोमेषु
होमयेत्॥पक्षशुक्लंतुपालाशमौदुंबरदिनत्रयं॥त्रिदिनंपिप्प
लश्चैवअपामार्गंचिनाह्निनं॥खदिरार्ककुशादूर्वाशमितान्का

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

ल्लिकाभवेत्॥ मूलकर्मविनाशाय मध्यमं पुत्रशांनाशनं॥ अथे
णव्याधिपीडश्च एकेपाणिंधनक्षयं॥ मूलेमध्यममूलंवासान्निद्धे
मस्यलक्षणं॥ चतुरंगुलमात्रंस्यादेवाछेन्नाग्रनाकृतिः॥ अन्नमंगु
ष्ठमात्रंस्यात्स्रुजामुष्टिमिताभवेत्॥ तिलसर्षपसक्तूनांश
क्तिमात्राविधीयते॥ चतुःषष्टिमिताव्रीहीन्यवगोधूमचाकृतिः॥
तिलानांचतुरासीतिर्द्रवस्तुचतुरांगुलः॥ औन्थुष्काकृतिर्दिशा
पर्वपूरितापक्वाकृतिर्बादरिकप्रमाणं॥ घृताकृतिर्माषनिम
ग्नयाराकृताशनस्योपरिषोडशांगुलं॥ होमेमुद्रात्रयःप्रो
क्तामृगीहंसीचसूकरी॥ सूकरीकरसंकोचीहंसीमुक्तकनिष्ठि
का॥ कनिष्ठातर्जनीमुक्तामृगीसापरिकीर्तिता॥ मृगीचोर्ध्व
मुखीचैवहंसीस्यात्सार्ध्वतामुखी॥ सूकर्यधोमुखीचैवमुद्रा
स्त्रयमुदाहृतः॥ यज्ञेशांतिककल्याणेमृगीहंसीप्रकीर्तिता॥
अभिचारान्नहोमेषुसूकरीपरिकीर्तिता॥ दशपंचहराश्चैव
पंचाशत्संचविंशतिः॥ शतमष्टोत्तरंचैव अक्षसूत्रस्यलक्षणं॥
जीवनतुर्गुणंप्रोक्तंहृष्टकेरष्टमेवच॥ अंगुल्येकगुणंज्ञाप्यपर्व
णोदशभिर्गुणो॥ शंखानांचशतंविद्यात्सहस्रंदेवतालये॥ ती
र्थेशतसहस्रंतुपर्वतेकोटिरुच्यते॥ समुद्रेनंतमित्याहभगवान्बौ
धायनः॥ इतिप्रायश्चितसमाप्तं॥ शिंकाप्रश्न॥ पूर्वेशिंकाभवेन्मृ
त्युराग्नेय्यांसुखसंपदा॥ हानिस्तुदक्षिणेभागेनैर्ऋत्यांप्रियदर्श
नं॥ पश्चिमेइष्टलाभःस्याद्वायव्यांश्रेयसंपदा॥ उत्तरेकलहंविद्या
दीशान्यांचधनागमं॥२॥ सर्वेषामेकजातानामेकश्चेदग्निमान्भ
वेत्॥ त्रेताग्निनाहितेसर्वेसाग्निकामनुरब्रवीत्॥३॥ विप
दिधैर्यमथाभ्युदयेक्षमासदसिवाक्पटुतायुधिविक्रमः॥
यशसिचाभिरुचिर्व्यसनंश्रुतौप्रकृतिसिद्धमिदंहिमहात्म
नां॥४॥ नाहंविशंकेसुरराजवज्रान्नत्र्यक्षशूलान्नयमस्य
दंडात्॥ नाग्न्यर्कसोमानिलवित्तपास्त्राच्छंकेभृशंब्रह्मकु
लावमानात्॥५॥ पाषाणनिकषग्रावामातिहेम्नःसरस्वती॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

शाज्ञेतरपरिच्छेदंवच्चसैवकरोतिया॥६॥हंसःश्वेतोबकःश्वे
तःकोभेदबकहंसयोः॥क्षीरनीरपरीक्षायांहंसोहंसोबको
बकः॥७॥आचांतोप्यशुचिस्तावद्यावत्पात्रंनचोद्धरेत्॥उद्धृ
तेप्यशुचिस्तावद्यावद्भूर्नप्रमार्जिता॥८॥विप्रास्मिन्नगरेम
हान्वसतिकस्तालद्रुमाणांवनंकोदातारजकोददातिवसनं
प्रातर्गृहीत्वानिशि॥कोदक्षःपरदारवित्तहरणेसर्वेपिद
क्षाजनाःकिंत्वंजीवसिहेसखेविषकृमिन्यायेनजीवाम्यहं॥
॥९॥यदाकिंचिज्ज्ञोहंगजइवमदांधःसमभवंतदासर्वज्ञोस्मी
त्यभवदवलिप्तंममनमनः॥यदाकिंचित्किंचिद्बुधजनसकाशा
दवगतंतदामूर्खोस्मीतिज्वरइवमदोमेव्यपगतः॥१०॥गं
धःसुवर्णफलमिक्षुदंडेनाकारिपुष्पंखलुचंदनस्य॥विद्वा
न्धनाढ्यःसदीर्घजीवीधातुःपुराकोपिनबुद्धिदोभूत्॥
॥११॥शतनिष्कसमर्थश्चशतग्रामेणभूपतिः॥शतौषधी
भिर्वैद्यस्याच्छतश्लोकेनपंडितः॥१२॥मंथुरामध्योस्मल्लाः
कृतयुगधर्मानुसारिणःसर्वे॥इतिरोषाद्विकलिनापीड्यं
तेसाधवःसर्वे॥१३॥प्रजापीडनसंतापात्समुद्भूतोहुताशनः
॥राज्ञःकुलंश्रियंप्राणान्नादग्ध्वाविनिवर्त्तते॥१४॥मत्क्षे
त्रवासिभिःसर्वैरन्यैर्देशांतरागतैः॥त्वंसिंधोसर्वदासेव्यःस्ना
नपानावगाहनैः॥येशापाःब्राह्मणैःपूर्वंदत्तास्तेपयसान्नि
धे॥मत्क्षेत्रेनभविष्यंतिचतुराशीतियोजने॥१६॥अज्ञानमू
लनाशायजन्मबंधविमुक्तये॥ज्ञानवैराग्यसिध्यर्थंविप्रपादो
दकंपिबेत्॥१७॥मणिनावलयंवलयेनमणिर्मणिनावलयेन
विभातिकरः॥कविनाचविभुर्विभुनाचकविःकविनाविभुनाच
विभातिसभा॥१८॥बहूनामल्पसाराणांसमुदायोहिदुर्जयः॥
तृणैर्विधीयतेरज्जुःसापिवध्नातिकुंजरं॥१९॥

तुल्यौनौ शुद्धनंदाद्यादिहारितिथिभिन्यूनतुल्याधिकाः षट् विद्धो ना
वापि तत्रोपाति वा निर्ग्रहिणां पूर्वमेवोचितास्ताः॥ शुद्धाधिक्ये
समो नाजातिथिरुतत्तथा विद्धसाम्ये च तत्रोप्येका विद्धाधि
को नाजातिथिरिह यातस्मात्तयोरुत्तराद्ये॥३॥ शुद्धाधिक्ये च
विद्धाधिकतरमपि यद्वृद्धि तुल्यं त्रयोस्मिन्विद्धाधिक्ये च सर्वे
प्युपवसतु परां वै द्वादशीं वृद्धिसाम्ये॥ एकादश्यां त्यपादत्रय
मुपरिदिने द्वादशी पूर्वपादं हित्वा भुंजीत कामो न्हभुजि मत्तह
रावान्हिकं रात्रिशेषं॥२॥ षट्पंचाशाद्धरीयुक्दिन निचयभवो
पुष्पवंतौ प्रसाध्यौ सोराद्या द्वाष्ट तुल्या चरामिहादिनमत्त्वर्णमत्र
स्फुटौ तौ॥ साशुद्धैकादशी चेदरुणममुष्ये तुल्यालिप्ता चालि
प्ता सोरिभ्य श्वं द्वालिप्ता ऽतत्च समाधिका त्वन्यथा विद्धा विद्धा॥२॥
प्राग्यं नाडी च तुष्कं सवितुरुदयतस्तद्युतं चेद्दशम्या विद्धा चै
कादशी सा भगवदनुसरैस्तत्सभनैव कार्या॥ नंदाधिक्ये न वि
ष्णोल्वधिकतरहरौ विष्णुनंदा व सेव द्वादश्यां तद्व्रतं स्यात्कुनि
रपि तु न चेद्द्वादशी साज यायां॥४॥ शुद्धाप्यविद्धा विज्ञेया
परतो द्वादशी यदि॥ अविद्धापि च शुद्धास्यात्परतो द्वादशी न चे
त्॥ वृद्धावापिक्षये वापि दशम्यादि दिनत्रये॥ उपोष्या द्वादशी
शुद्धा त्रयोदश्यां तु पारणं॥६॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

अथद्वादशवर्षाद्दूर्ध्वमवलोकनविधिः दंपतीपितृपुत्र
श्वश्रूश्वशुरौभ्रातरौतथा ॥ पितृव्यमातुलौचैवद्वौहि त्रौभा
गिनेयस्तथा १ पुत्रिकापितरौचैव भगिनीभ्रातरौतथा
द्वादशाब्द्यतीतेतुदूरदेशागतोयदि २ एतेषामेकमेक
पिनान्योन्यमवलोकयेत् इच्छंतिकेचिदाचार्याअन्योन्य
मवलोकनं ३ शिवालयेऽथवातीर्थे स्नात्वाप्रज्वाल्यदी
पकौ शिवंसंपूज्यविधिवत् उभौतौदेवसंमुखौ ४ धृत्वाकांस्य
मयंपात्रंसजलंरत्नभूषितं शांतिदैर्मंत्रघोषैश्च द्विजैःसहावलो
कयेत् ५ आननंचैकमेकस्य दृष्ट्वासम्यक्शिवंनमेत् ब्राह्म
णेभ्योयथाशक्त्यादद्यात्पात्रंतुदक्षिणां अन्येभ्यश्चातिवि
प्रेभ्योयथावित्तानुसारतः तेभ्योपिदक्षिणांदत्वा पूजयेच्चपुनः
पुनः नत्वादेवंद्विजंसर्वं आगत्यस्वस्वमंदिरं ततोव्याहृतिभि
र्होमं शतमष्टोत्तरंतिलैः कृत्वाचभोजयेद्विप्रान् यथावित्ता
नुसारतः ब्राह्मणैःसहभुंजीत सर्वारिष्टप्रशांतये ६ इत्थंयःकु
रुतेमर्त्यस्तस्यारिष्टंनविद्यते आयुःकामीनरश्चेदमकृत्वा
नावलोकयेत् पूर्वावलोकनीयांतुविधिरेषउदाहृतः नचै
वापूर्वदृष्टानामितिप्राकुर्मनीषिणः इतिधर्मप्रवृत्तिस्थः
अथश्राद्धभोजनप्रायश्चित्तं वराहोधरणींप्राह पराकस्तुस
मुद्दिष्टोमहैकोद्दिष्टभोजिनः ॥ नवाहेचैवपाथेयेनग्नप्रच्छादने
तथा ॥ आद्यश्राद्धाशिनाकार्यं माशिकोद्दिष्टभोजिनः ॥ स
पिंडीकरणश्राद्धे प्राजापत्यचतुष्टयं ॥ सपिंडीकरणादूर्ध्वंमा
सिकंपार्वणंभवेत् ॥ एकोद्दिष्टेतुयःकुर्यात्सपिंडीकरणेकृते तच्छ्राद्धं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

निष्फलं प्रोक्तं पुनः प्रेतत्वमाप्नुयात् पार्वणे मासिके भुक्त्वा प्राजापत्यं वि
शोधनं आह्निके प्रथमे प्रोक्तमुपवासस्त्रयं बुधैः प्रत्यहं तु प्रकुर्वीत दिन
मेकमुपोषणं सहस्रं वाथ गायत्र्या जपेन्नियतमानसः क्षयाहे तु पु
राणाशी दिनद्वयमुपोषयेत् मासमेकं तु योऽश्नाति परान्नं पिष्टमेव वा प्रा
जापत्यं विशुध्यर्थं यदि भक्त्येव लभ्यते राहुपरागे यो भुंक्ते पराक्रे तस्य शो
धनं पराक एकः कथितो वटश्राद्धे तथाश्रुतः वैधृतो च व्यतीपाते षड
शीतिमुखे तथा तथा विष्णुपदे भुंक्ते एकाहं समुपोषयेत् मन्वादौ च
युगादौ च प्रेतपक्षे तथाश्रुतः तथा नैमित्तिके श्राद्धे गायत्रीं द्विशतं ज
पेत् अयने विषुवे चैव भुंजानस्य विशोधनं गायत्र्ययुतपादस्या तथैवो
पोषणद्वयं अमावास्या दिने यस्तु परान्नाशी भवेन्नरः गायत्री वह
सहस्रं तु तेन जाप्यं विशुध्यये शतद्वयं जपेज्जीवत्पितृकोपात्तशुध्य
ये प्रेतपक्षी यदर्शेषु तद्वा दशगुणं स्मृतं प्रायश्चित्तार्थमुद्दिष्टं ब्राह्मण
स्य प्रवासिनः तदर्धं तु हरि[illegible] महापद्दिनकं चनेति विदुः आमश्रा
द्धाशने त्रिरात्रमिति अभ्यासे मासं एतदापद्विषयं मासिकाशने
त्र्यहमुपवास एकाहमुदकवासः अनुक्तप्रायश्चित्तेषु सर्वत्र उशना द
शकृत्वः पिबेदापो गायत्र्या श्राद्धभुक् द्विजः ततः संध्यामुपासीत शु
ध्येत्तु तदनंतरमिति आमश्राद्धे तु सचैत्रार्धमिति तथा षट्त्रिंशन्मते
आमश्राद्धे भवेदर्धं प्राजापत्यादि सर्वदेति महालये गयाश्राद्धे तीर्थश्रा
द्धे विशेषतः सापत्नभगिनी भ्रात्रोः पिंडदानं प्रशस्यते सापत्नमातु
लस्यापि जामातुर्दत्तकस्य च पिंडदानं प्रकर्तव्यमिति शातातपो ब्रवी
त् ॥ गजानेन ॥

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

ॐ अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि ॥ यक्ष्मं
शीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि ते ॥ ग्रीवाभ्यस्तऽ
उष्णिहाभ्यः कीकसाभ्योऽअनूक्यात् ॥ यक्ष्मं दोषण्य१
मंसाभ्यां बाहुभ्यां विवृहामि ते ॥ आंत्रेभ्यस्ते गुदाभ्यो
वनिष्ठोर्हृदयादधि ॥ यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो
विवृहामि ते ॥ ऊरुभ्यां तेऽअष्ठीवद्भ्यां पार्ष्णिभ्यां प्रप
दाभ्यां ॥ यक्ष्मं श्रोणिभ्यां भासदाद्भंससो विवृहामि
ते ॥ मेहनाद्वनंकरणाल्लोमभ्यस्ते नखेभ्यः ॥ यक्ष्मं स
र्वस्मादात्मनस्तमिदं विवृहामि ते ॥ अंगादंगाल्लो
म्नोलोम्नो जातं पर्वणिपर्वणि ॥ यक्ष्मं सर्वस्मादात्म
नस्तमिदं विवृहामि ते ॥ १

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

मंगलाष्टके ॥ स्मृत्वादौ गणनायकं वधुवरौ तंडूलपुंजोस्थितौ
नांदीलिप्तपटं परस्परतरं संदृश्यमानाउभौ ॥ विप्रैर्मंगल
मंत्रपद्यपठनं चोदकूपटाकर्षणं ॐ पुण्ये
सनयोर्विमृध्निकरजै स्तंडूलकैर्मंगलं ॥ १ ॥ अभ्रातृघ्न
अघोरचक्षुरिति जपंदृष्ट्वानवोढावधू सव्याहृत्यकुशैर्वि
मृज्य शुभदैस्तस्याभ्रुवोरंतरं ॥ स्पृष्ट्वा मंगलतज्जलं सवधु
कं विप्रास्तुतो ऋकुचवामंत्रैर्मूर्ध्नि विनिक्षिपेच्च शुभदं पीताक्ष
तान्मंगलं ॥ २ ॥ तंचान्नक्षरमंत्रपाठपठनात्कृत्वा वरं प्राङ्मुखं
सादत्ताभरणैरलंकृतवधू प्रत्यङ्मुखीसोत्सवा ॥ दाता दक्षि
णतस्तयोरुपविशेत्सलीसहोदङ्मुखः प्राणायाम्यच देशका
लकथनं क्षिप्त्वा जलं मंगलं ॥ ३ ॥ स्वस्तीत्येव मनुस्मरन्नवव
धूसदृक्षिणं संस्पृशे त्केदंमंत्रमगायदान ददृता गौरी ततः
कन्यका ॥ धर्मश्चार्थमितिप्रकीर्त्य शुभदं द्रव्येणयुक्तं जलं द
त्वान्येन वरेण ओमिति वदन्स्वस्तीति सन्मंगलं ॥ ४ ॥ दाता
भाजन भोजनादिसकलं गोदानपूर्वांतरं दद्यादुद्भवं संभवं
स्मृतिसुतैर्मंत्रैर्जलस्यार्पणं ॥ यत्कक्षीतिवसंस्पृशन्नवव
धूकुक्षिं वरेणास्पृशेत् गंगाधुंसा ... लानि मंत्रमनुजानाथ
श्रुतोन्मंगलं ॥ ५ ॥ दूर्वापल्लवकाद्दर्जैर्कुतरैरानः प्रजामंत्र
तोचान्यैर्वा बहुभिः प्रसेननविधे मंत्रैस्तयोर्मार्जनं ॥ दुग्धात्के
नसयुग्मकेन च तयोः सूत्रेण कंठेकटौ मंत्राच्चैव परित्वत
श्चतुरकं पंचैवतान्मंगलं ॥ ६ ॥ कृत्वा कंठगतस्त्वधःकटिग
तं चोर्ध्वं समाकर्षणं सालक्तं सहरिद्रखंडकयुतं तत्कंकणं स
र्वदा ॥ कस्त्वं नीहलयलोहितेन मनुनाकन्याकरे वामके ध्व
न्येनैव वरस्य दक्षिणकरे स्तन्मंत्रतोन्मंगलं ॥ ७ ॥ कुत्वाच्चार्य
मणं च वारुणमथो पूषानलं लाजकैः प्रत्येकं परिणीय वान्हि
मपरं पाषाणरोहस्तथा ॥ पश्चात्सप्तपदीध्रुवेक्षणमे
थोपमप्रवेशाकृतिरित्थं कर्मविधौ विवाहसमये कुर्यात्स
दा मंगलं ॥ ८ ॥ भास्वान्काश्यपगोत्रजोरुणरुचिर्यासिंह

राशीश्वरोषट्त्रिस्थोदशशोभनोगुरुःशशिभौमेषुमित्रःस
दा॥शुक्रोमंदरिपुःकलिंगजनितश्चाग्नीश्वरोदेवतमध्ये
वर्त्तुलपूर्वदिग्दिनकरःकुर्वंतुवोमंगलं॥१॥चंद्रःकर्कट
कःप्रभुःसितनिभश्चात्रेयगोत्रोद्भवश्चाग्नेयश्चतुरस्रवा
रुणमुखश्चापोउमाधीश्वरः॥षट्सप्ताग्निदशैकशोभ
नफलोशौरीगुरार्कप्रियःपालाशोमुनिदेशजोहिमकरः
कुर्यात्सदामंगलं॥२॥भौमोदक्षिणदिक्त्रिकोणयमदिग्वि
ध्येश्वरोरक्तभःस्वामीवृश्चिकमेषयोःसुरुगुरुश्चार्कःशशी
सौहृदः॥ज्ञोरीषट्त्रिफलप्रदश्चवसुधास्कंदःक्रमाद्देवता
भारद्वाजकुलोद्भवःखदिरःकुर्या०॥३॥सौम्योदङ्मुखपी
तवर्णमगधश्चात्रेयगोत्रोद्भवोबाणेशानदिशःसुहृच्छ
निभृगुःशत्रुःसदाशीतगुः॥कन्यायुग्मपतिर्दशाष्टचतु
रःषण्नेत्रगःशोभनोविष्णुःपौरुषदेवतेशशिसुतःकुर्या
त्स०॥४॥जीवश्चांगिरगोत्रजोत्तरमुखोदीर्घोत्तरासंस्थि
तःपीतोश्वत्थसमिच्चसिंधुजनितश्चापोथमीनाधिपः॥सू
र्येंदुक्षितिजाप्रियोबुधसितःशत्रुःसमश्चापरेसप्ताद्वि
भुवःशुभःसुरगुरुःकुर्या०॥५॥शुक्रोभार्गवगोत्रजःसित
निभःप्राचीमुखःपूर्वदिक्पंचाकोवृषभोतुलाधिपमहारा
ष्ट्राधिपोदुंबरः॥इंद्राणीमघवाबुधश्चबुधशनिर्मित्रेर्कचंद्रौरि
पुःषष्ठोद्विद्दशवर्जितोभृगुसुतःकुर्या०॥६॥मंदःकृष्णनिभ
स्तुपश्चिममुखःसौराष्ट्रगःकश्यपःस्वामीमंगकुंभयो
र्बुधसितःशत्रुःसमश्चापरे॥स्थानंपश्चिमदिक्प्रजापतिय
मौदेवौधनुर्ध्यासनोषट्त्रिस्थःशुभकृच्छमीरविसुतः
कुर्या०॥७॥राहुःसिंहलदेशजो निरृतिःकृष्णांगस
र्पासनोयःपैठीनसिगोत्रसंभवसामिदूर्वामुखोदक्षिणः॥
यःसर्पाद्यधिदैवतश्चनिरृतिप्रत्याधिदेवःसदाषट्त्रिस्थः

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(16)

शुभकृच्चासिंहिकसुतः कुर्या०॥८॥ केतुर्जैमिनी गोत्रजः कु
शसमिद्वायव्यकोणोस्थितः श्चित्रांगध्वजलांछनोहिमरु
हायोदक्षिणाभीमुखः॥ ब्रह्मा चैव सचित्रगुप्तसहितोय
स्याधिदेवः सदा षट्त्रिंस्थः शुभकृच्च बर्बरपतिः कुर्यात्स
दा०॥९॥ इत्येतद्ग्रह मंगलाष्टकमिदं लोकोपकारप्रदं पापा
घप्रशमं महत् शुभकरं सौभाग्यसंवर्धनं॥ यः प्रातः शृणु
यात्सठेदनुदिनं श्रीकालिदासोदितं स्तोत्रं मंगलदायकं
सुपठनं प्राप्नोति सभीष्टं सदा॥१०॥ धान्यः कार्तिकमासि बिं
दुसलिले गंगाजले निर्मले प्रातः स्नानविशुद्धदिव्यमतयो
गायंति नृत्यंति च॥ क्षीरस्नानविलेपनैः सुकुसुमैर्नानाप
हारैर्युता राधामाधवयोर्विवाहसमये कुर्वंतु वो मंगलं॥११
द्वारी कल्पतरुः प्रचंड तुलसीवृंदावने आंगणी वेदाचीप
ठण पुसण गणित वेदांतशास्त्रस्मृतिः॥ यज्ञारंभ महो
त्सवो प्रतिदिनं श्रीअग्निहोत्रं द्विजं ब्रह्मज्ञान विचार की
र्तनकथा कुर्यात्सदा मंगलं॥१२॥ भूपाले संगमे चैव छाया
यां श्रीगिरिगौरी तथा॥ सर्वत्र सुलभा कृष्णा चतुःस्थाने सुदुर्लभा॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. " Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

रविरामंशनिर्बाणंकुजश्यामार्धमेवच ॥ क्रमेणघटिकात्याज्यं
सर्वसिद्धिप्रदाभवेत् ॥ १ ॥ एकेसत्पुरुषाःपरार्थघटकाःस्वार्थंपरि
त्यज्ययेसामान्यास्तुपरार्थमुद्यमभृतःस्वार्थाविरोधानये ॥ ते
मीमानुषराक्षसाःपरहितंस्वार्थायनिघ्नंतियेयेतुघ्नंतिनिर
र्थकंपरहितंतेकेनजानीमहे ॥ २ ॥ पुराणांतेस्मशानांतेमैथुनां
तेचयामतिः ॥ सामतिःसर्वकालेस्याज्जीवन्मुक्तोनसंशयः ॥ ३ ॥
गुणवदगुणवद्वाकुर्वताकार्यमादौपरिणतिरवधार्यायत्नतः
पंडितेन ॥ अतिरभसकृतानांकर्मणामाविपत्तेर्भवतिहृदय
दाहीशल्यतुल्योविपाकः ॥ ४ ॥ राजतःसलिलादग्नेश्चोरत
स्वजनादपि ॥ भयमर्थवतांनित्यंमृत्योःप्राणभृतामिव ॥
॥ ५ ॥ अन्होमुहूर्त्ताविख्यातादशपंचचसर्वदा ॥ तत्राष्ट
मोमुहूर्त्तोयःसकालःकुतुपःस्मृतः ॥ ६ ॥ मध्यान्हेसर्वदा
यस्मान्मंदोभवतिभास्करः ॥ तस्मादनंतफलदस्तत्रारंभो
विशिष्यते ॥ ७ ॥ ऊर्ध्वंमुहूर्त्तात्कुतुपाद्यन्मुहूर्त्तचतुष्टयं ॥ मु
हूर्त्तपंचकंह्येतत्स्वधाभवनमिष्यतः ॥ ८ ॥ इतिवचनात् ॥
सगुरुर्यःक्रियाःकृत्वावेदमस्मैप्रयच्छति ॥ उपनीयददद्वेदं
माचार्यःसउदाहृतः ॥ ९ ॥ एकदेशमुपाध्यायऋत्विक्यज्ञ
कृदुच्यते ॥ एतेमान्यायथापूर्वमेभ्योमातागरीयसी ॥ १० ॥
श्रीदत्तंनारदंव्यासंशुकंचपवनात्मजं ॥ कीर्त्तिवीर्यंचगोरक्षं
सप्तैतेस्मर्तृगामिनः ॥ ११ गीतहास्याविनोदेनकालोगच्छ
तिधीमतां ॥ इतरेषांतुमूर्खाणांनिद्रयाकलहेनवा ॥ १२ ॥
अष्टोपाद्गाबुधेस्युर्नवधरणिसुतेसप्तजीवेपदानिज्ञेयाए
कादशार्केशशिनिशनिभृगुजेसार्धचत्वारिपादौ ॥ तस्मिन्का
लेमुहूर्तोसकलगुणयुतोकार्यसिद्धिःशुभोक्तानास्मि
न्पंचांगशुद्धोनरवचरवलंभाषितंगर्गमुख्यैः ॥ १३ ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

श्रीगणेशायनमः॥श्रीकुळदेवतायैनमः॥श्रीगुरु
दत्तायायनमः॥ सजयतिसिंदुरवदनोदेवोयत्पादपंक
जस्मरणं॥वासरमणिरिवतमसां राशींनाशयतिवि
घ्नानां॥ दग्धंखांडवमर्जुनेनचवृथाकिं[illegible]तं॥द
ग्धंवायुसुतेनहेमनगरीलंकापुरीस्वर्णभो ॥दग्धसर्व
सुखंहरेणमदनंकिंतेनयुक्तंकृतं दारिद्र्यंजनतापका
रकमिदंकेनापिदग्धंनहि॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

॥सिंहीनिशासिंहमुखीगुडूचीविश्वोपकूल्याभयजाघनानां॥
॥ कृष्णामरीचैर्मिलितःकषायःश्वासाटवीदाहपयो
॥दएषः॥१॥

श्रीः॥नमामिदेवदेवेशंवक्रतुंडमहाबलं॥षडक्षरंग
णोपेतंनमामिऋणमुक्तये॥१॥एकाक्षरमेकदंत
मेकब्रह्मसनातनं॥एकमेवाद्वितीयंतंनमामिऋ०॥२॥
महागणपतिंदेवंमहासत्वंमहानुघं॥महाविघ्नह
रंदेवंनमामिऋ०॥३॥रक्तांबरंरक्तवर्णरक्तगंधानुले
पनं॥रक्तपुष्पैःपूज्यमानंनमामिऋ०॥४॥कृष्णांबरं
कृष्णवर्णकृष्णगंधानुलेपनं॥कृष्णपुष्पैःपूज्यमानंन
मा०ऋ०॥५॥धूम्रांबरंधूम्रवर्णधूम्रगंधानुलेपनं॥
होमधूम्रप्रियंधामनमामिऋ०॥६॥सर्वांबरंसर्ववर्ण
सर्वगंधानुलेपनं॥सर्वपुष्पप्रियंचैवनमामिऋणमु
क्तये॥७॥एतद्दृणहरंस्तोत्रंप्रातःप्रातःपठेन्नरः॥
षण्मासाभ्यंतरेराज्यंऋणमुक्तोभविष्यति॥इतिश्री
लिंगपुराणेव्यासयुधिष्ठिरसंवादेऋणहरंमहा
गणपतिस्तोत्रंसंपूर्णं॥ ७ ॥ ७ ॥ ७ ॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai, Joint project of the

शन्यर्कभौमानिशिपातसुपर्वसंध्याश्राद्धं स्युत्तरार्क पित्र मैत्राद्ब्ना
दिषष्ठ्यां॥कार्येनारिक्ततिथिसुव्रतपेतकेषु क्षौरं घटे धनुषिक
■र्करकेंगनायां॥भुक्त्वाभ्यक्तोपवासीश्वरजनयुवती प्राग्वयस्का
श्वयोगी यात्रा मुद्धोन्मुखायेकृतादिनाविधयोस्त्यंबकास्तेन मुंड्याः
सीमंतोर्ध्वेन पत्सुनखकचलवनंदूर देशे प्रयाणं वृक्ष छेदः समुद्रा
प्लुतिमृतहरणेस्यादवश्यकार्यात्॥२॥मासेमासेगृहस्था
नां पक्षेपक्षेच्चयज्वनां॥ऋतावृतौयतीनांच ह्ययनेब्रह्म■ चारि
णः॥३॥इष्टजनैःसहभुक्तं भुक्तं प्रियतमयासह सुप्तं सुप्तं॥रथतु
रगैर्यातं यातमन्यत्र मयातनभुक्तं नसुप्तं॥४॥गच्छगौतम
शीघ्रंत्वंग्रामेषुनगरेषुच॥उपकल्प्यथमेशीघ्रंशय्यामन्नंस
वस्त्रकं॥५॥गौतमस्यगृहे श्राद्धंअद्येवसमुपस्थितं॥वयंनिमंत्रि
तास्तेन गौतमोहिस्थगौतमः॥६॥अनवसरेगुणवानपिकंठा
दुत्तीर्यतेहारः॥पश्यशलाकासमयेतृणायभूपैः प्रसार्यतेस्वक
रः॥७॥नत्वत्त्रिरात्रेपुनसंचयेननपंडितेत्वोपिसुभाषितेन॥
नसागरेत्वत्तिमहाजलेन नचक्षत्वा■तःप्रियदर्शनेन॥८॥आ
पुष्पात्प्राप्सुरवादपि धनदस्याद्दुःस्वरवः॥प्रत्यक्षसुरवोदुःख
दोसोहानिदोदक्षिणमुखः॥९॥भोजनंहवनं दानं मुपहारः प्र
तिग्रहः॥बहिर्जानुन कार्याणि तद्वदाचमनंस्मृतं॥१०॥खलः
सर्षपमात्राणि परछिद्राणि पश्यति॥आत्मनोबिल्वमात्राणि
पश्यन्नपिन पश्यति॥११॥आश्रयवशेन सततं गुरुत्वालघु
त्वाचजायतेपुंसां॥विंध्येविंध्यसमानास्तएव करिणोदर्पणेल
घवः॥१२॥

सूर्येसप्तसहस्त्ररुद्रशशिनोभौमेदशज्ञश्चतुर्मर्कोन्विंशति
जीवभृगून्नृपतीमंदेत्रयोविंशतिः॥राहोरष्ट दशाचसप्त
मितयोकेतुश्चजाप्यंकृतंखेरोदुष्टरिपोग्निचोरनभयंत
स्यायुषःकीर्तितः॥रव्यादिन गुरु पूर्वसोमशुक्रेचयाम्यजल
धिशमापिभौमेचोत्तरेसौरिसौम्ये॥प्रातिदिशामतिगत्वाकाल
राहुर्दशायांसकलहरतिकार्यंवामपृष्ठेर्थसिद्धिः॥२॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(२१)

रविर्दशसहस्राणि चंद्रस्यैकादशैव तु ॥ भौमे सप्तसहस्रा
णि बुधस्याष्टसहस्रकं ॥ १ ॥ एकोनविंशतिर्जीवे शुक्रे
षोडश एव च ॥ त्रयोविंशति मंदस्य राहोरष्टादशैव तु ॥ २ ॥
केतुः सप्तसहस्राणि इत्येते ग्रहजाप्यकं ॥ अब्दं गुरुः पं
चयनानि सौरी त्रिपक्ष भौमश्च दशाष्टराहुः ॥ रवीच शु
क्रा बुध मासमेकं दिनद्वयं पादमथाधिचंद्रः ॥ ४ ॥ वेदाष्ट
द्वादशी कृष्णे शुक्ले द्वे नव पंचमे ॥ यथा माता सुतं रक्षेत्त
था रक्षतु चंद्रमाः ॥ ५ ॥ मेषे च सिंहे धन पूर्वभागे वृषे च
कन्या मकरे च याम्ये ॥ द्वंद्वे तुले कुंभगतः प्रतीच्यां कर्की
अलिमीनेदिशि चोत्तरे च ॥ ६ ॥ सन्मुखे अर्थलाभाय दक्षि
णे सुखसंपदा ॥ पृष्ठे च मरणं चैव वामे चंद्र धनक्षयः ॥
॥ ७ ॥ आश्विन्यां मैत्र रेवत्यां मृग मूल पुनर्वसू ॥ पुष्यः श्र
वणतो हस्तः प्रस्थाने कीर्तिदः शुभं ॥ ८ ॥ त्रीणि पूर्वा मघा
ज्येष्ठा भरणी जन्मकृत्तिका ॥ सर्प स्वाती विशाखा च चित्रा
गमनवर्जयेत् ॥ ९ ॥ परिघार्धं पंच भूलग्नषड्गंडाति
गंड्योः ॥ व्याघातेन वनाड्यश्च वर्ज्याः सर्वशुभकर्मसु ॥
॥ १० ॥ कुमास्वोत्तराग्नेय नैऋत्यमध्य पश्चिमे ॥ वायव्ये
शानयोर्योगिन्यस्थः प्रतिपदादिषु ॥ ११ ॥ अर्के क्लेशम
नर्थकं च गमनं सोमे च बंधुप्रियं अंगारानरतस्करराज्वर
भयं प्राप्तव्यमर्थं बुधे ॥ क्षेमारोग्य सुखं करोति गुरुणां
शुक्रस्य लाभस्तथा हानिर्भस्कन बंधनाशस्सहितं मंदे दि
नेगम्यतां ॥ १२ ॥ लक्ष्मीश्चंद्रखलाक्षिरवारिषुशुभाः सप्ताद्यगो
जः पुनः श्वापुत्राव्ययधर्ममृत्यकशुकविः स्वास्तात्रिकोणेगुरुः ॥
सौमोव्यंत्यसमोखिलाभवगतः शुक्रे नवेषु द्विगःश्चंद्रोथोनिज
भाद्युभं नवहृतं स्यद्दीपुशेषं नसत् ॥ १३ ॥

गतातिथ्यान्वितेदृष्टेनंदभक्तावशेषके ।। त्रिपंचाद्यंक संख्या
केलग्नांनिः पंचकं भवेत् ।। १ ।। एकोमृत्युर्द्वयंवान्हिश्चतुर्थं
राजपंचकं ।। षष्ठंचोराष्टमं रोगंशेषांनिः पंचकं भवेत् ।। २ ।।
माणिक्यगोधूमसवत्सधेनुंकोसुंभवस्त्रंगुडहेमताम्रं ।। आर
क्तकंचंदनमंबुजंच वदंतिदानंहिविरोचनाय ।। १ ।। सद्वंशपात्र
स्थिततंदुलाश्चकर्पूरमुक्ताफलशुभ्रवस्त्रं ।। युगोपयुक्तं वृषभं
च रौप्यं चंद्रायदद्यात घृत पूर्णकुंभं ।। २ ।। प्रवालगोधूममसूरि
काश्चवृषारुणश्चापिगुडः सुवर्णं ।। आरक्तवस्त्रंकरवीर
पुष्पंताम्रंहिभौमायवदंतिदानं ।। ३ ।। चैलंचनीलंकलधौ
तकांस्यंमुद्गाज्यगारुत्मकसर्वपुष्पं ।। दासीचदंतोद्वि
रदस्यनूनंवदंतिदानंविधुनंदनाय ।। ४ ।। शर्करारज
नीतुरंगमः पीतधान्यमपिपीतमंबरं ।। पुष्परागलवणं
चकांचनंप्रीतयेसुरगुरोःप्रदीयतां ।। ५ ।। चित्रांबरंश्वेत
तरस्तुरंगोधेनुश्चवस्त्ररजतंसुवर्णं ।। सुतंदुलाज्योत्तम
गंधयुक्तंवदंतिदानंभृगुनंदनाय ।। ६ ।। माषाश्चतैलंवि
मलेंद्रनीलास्तिलाःकुलित्थामहिषीचलोहं ।। सदक्षिणा
चेतिवदंतिनूनंतुष्टायदानंरविनंदनाय ।। ७ ।। गोमे
दरत्नंचतुरंगमश्चसुनीलचैलामलकंबलंच ।। तिला
श्चतैलंखलुलोहमिश्रंस्वर्भानवेदानमिदंवदंति ।। ८ ।।
वैडूर्यरत्नंसतिलंचतैलंसुकंबलश्चापिमदोमृगस्य ।।
शस्त्रंचकेतोःपरितोषहेतोरुदीरितंदानमिदंमुनींद्रैः ।। ९ ।।
खेटेसंधिद्वयांतस्थेफलंतद्भावजंभवेत् ।। हीनेधिके द्विसंधिभ्यांभा
वपूर्वापरेफलं ।। १० ।। एवंदशापक्षकनिष्ठिकासु द्विपक्षरुद्राश्च अनामिकायां ।।
त्रिसप्तमंद्वादशमध्यमासु समुद्रविश्वेग्रहतर्जनीषु ।। अंगुष्ठकेबाणमुनिप्रभू
तअंगुष्ठसंज्ञामुनयोवदंति ।। अहर्निशंस्वांगुलिकांपरेणधृत्वाविचार्यंघटिका
दिमानं ।। यस्मात्सितन्वंगाश्राद्धेषुप्रीतमध्वम्लतोद्भवं ।। तस्मात्तवप्रदानेनर

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. Joint project of the

येखेचरा गोचरतोऽष्टवर्गाद्दशाक्रमाद्याप्य शुभाभवंति ॥ दानादि
नातेतितरांप्रसन्नास्तेनाधुनोदानविधिंप्रवच्मि ॥ १ ॥ गजानन

शुक्ले पूर्वार्धेष्टमीपंचदश्योभद्रैकादश्यां चतुर्थ्यांपरेर्द्धे ॥
कृष्णेंत्यार्द्धे स्यात्तृतीयादशम्योः पूर्वेभागेसप्तमीशंभु
तिथ्योः ॥ ३ ॥ ब्राह्म्यं ॰त्तरयुक् ध्रुवंस्थिरमथोपूर्वामघाया
म्यभंक्रूरोग्रंश्रवणत्रयादितियुतास्वातीचराख्याचला ॥
दस्त्रार्काभिजिदीज्यभंलघुतथाक्षिप्रंचमैत्रांतिमेंदुत्वाष्ट्रमृदुमै
त्रमाग्नि भाविशेमिश्रेचसाधारणे ॥ २ ॥ मूलाहींद्रशिवं
चदारुणमदस्तीक्ष्णंमुनींद्रैस्मृतंसंज्ञातुल्यमिहाचरं
तिसुधियःकार्यंहि सिद्ध्यै ॥ अथसर्वतोभद्रकारि
का ॥ प्रागुदीच्यांगतारेखाःकुर्यादेकोनविंशतिः ॥
खंडेंदुः स्निपदःकोणेष्वंखलाःपंचभिःपदैः ॥ १
एकादशपदावल्यो भद्राणि नवभिःपदैः ॥ चतु
र्विंशस्तदावाप्यःपरिधिर्विंशतिस्तथा ॥ २ ॥ मध्ये
षोडशभिःकोष्ठैःपद्ममष्टदलंस्मृतं ॥ श्वेतेंदुः
श्रृंखलाःकृष्णावल्योनीलेनपूरयेत् ॥ ३ ॥ भद्र
रूणासितावाप्यःपरिधिःपीतवर्णकः ॥ बाह्येत
रदलाश्वेताकर्णिकापीतवर्णका ॥ ४ ॥ परिध्या
वेष्टितंसर्वंबाह्येसत्वंरजस्तमः ॥ तन्मध्येस्था
पयेद्देवान्ब्रह्माद्यांश्चसुरेश्वरान् ॥ इतिसर्वतो
भद्रकारिकाः ॥ अथलिंगतोभद्रकारिकाः ॥ च
तुर्विंशतिरालेख्यारेखाःप्राग्दक्षिणायताः ॥
कोणेषुश्रृंखलाःपंचपदावल्यस्त्रिपार्श्वतः ॥ १
पदैर्नवभिरालेख्याश्चतुर्भिर्लघुश्रृंखलाः ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

लघुवल्ल्यः पदैः षड्भिस्ततोष्टादशाभिः पदैः॥ २॥ कृत्वा
लिंगानि वाप्यस्तुस्त्रपोदशाभिरंतरा॥ ततो वी
थिद्वयेनैव पीठं कुर्याद्विचक्षणाः॥ ३॥ तस्य पादाः
पंचपदा द्वाराण्यपि तथैव च॥ एकाशीतिपदं मध्ये
पद्मं स्वास्तिकमिष्यते॥ ४ कोणेषु श्रृंखलाः कार्याः
पदैस्त्रिभिरतः परं॥ पदैश्चतुर्भिर्दिक्षुस्युर्भद्राण्ये
षां समंततः॥ ५॥ एकादशपदावल्ल्यो मध्ये ष्टदल
मालिखेत्॥ पद्मेन वपदं ह्येवं लिंगतो भद्रमिष्य
ते॥ ६॥ श्रृंखलाः कृष्णवर्णेन वल्लीनीलेन पूरये
त्॥ रक्तेन श्रृंखलालक्ष्मी वल्लीः पीतेन पूरयेत्॥
लिंगानि कृष्णवर्णानि श्वेतेनाप्यथवापिकाः॥
पीठं सपादं श्वेतेन पीतेन द्वारपूरणं॥ ८॥ मध्ये
स्युः श्रृंखलास्तत्कावल्लीनीलेन पूरयेत्॥ भद्राणि
पीतवर्णानि पीतापकजकर्णिका॥ ९॥ दलानि
श्वेतवर्णानि यद्वाचित्राणि कल्पयेत्॥ तिस्त्रो रे
खा बहिः कार्याः सितरक्ताः सिताः क्रमात्॥ १०
इति लिंगतो भद्रकारिकाः॥ ॥ मृगाश्विनीपुष्य
पुनर्वसूच हस्तानुराधा श्रवणं च मूळ॥ धनिष्ठरे
वत्यरुतं प्रयाणं फलं लभेच्छीघ्रमवाप्नुवंति॥ १॥
प्रभवो विभवः शुक्लः प्रमोदोथ प्रजापतिः॥ आंगिराः श्रीमुखो
भावा युवाधाता तथैव च॥ ३॥ ईश्वरो बहुधान्यश्च प्रमाथी
विक्रमो वृषः॥ चित्रभानुः सुभानुश्च तारणः पार्थिवो

(25)

मयः॥२॥सर्वजित्सर्वधारीचविरोधीविकृतिः खरः॥नंद
नोविजयश्चैवजयोमन्मथदुर्मुखी॥३॥हेमलंबीवि
लंबीचविकारीशार्वरीप्लवः॥शुभकृछोभकृत्क्रोधी
विश्वावसुपराभवः॥४॥प्लवंगःकीलकःसौम्यःसा
धारणविरोधिकृत्॥परिधावीप्रमादीचआनंदो
राक्षसोनलः॥५॥पिंगलःकालयुक्ताचसिद्धार्थी
रौद्रदुर्मती॥दुंदुभीरुधिरोद्गारीरक्ताक्षीक्रोधनक्ष
यः॥६॥अंबुवल्लीशिरोवल्लीरक्तवल्लीदिवालिका॥गुडुच्यें
द्रीपटोलीचसप्तवल्यःप्रकीर्तिताः॥१॥न्यग्रोधःकिंशुकोवे
णुकारवीकंकणीतथा॥धात्रीनिर्गुंडिकाचैवसप्तकाष्ठाःप्रकी
र्तिताः॥२॥वृषेसिंहेमृगुवारिनेद्व्याघ्रंतुबालवे॥ताऽराहे
कौलवेसोरीवैतिलेमनुजोरविः॥बुधेमरंगजछाया
गुरुर्वणिशुनंतथा॥कुजेवृष्टिरनडुाचकरणाधाःप्रकीर्ति
ताः॥४॥सर्पक्षाछिन्नभंनवेखुरहरयेड्डागेहारजंबुकोमंडूको
विमयूरमूषककसषात्स्यामृदेभःकुंजरः॥बोहानांनवकेहारहे
रजलंक्रोष्टाविकोनिर्जलंस्वल्पकोपिखरेषुन्चेप्रचुरताशेषेषु
वृष्टिःशुभः॥५॥तीक्ष्णमिश्रध्रुवोग्रेर्यद्द्रव्यंदत्तंनिवेशितं॥
प्रयुक्तंचविनष्टंचाविसांपातेचनाप्यते॥६॥पुन्नक्षत्राणिचे
तानिपुष्योहस्तःपुनर्वसुः॥अभिजित्प्रोष्ठपाच्चैवअनुराधा
श्वियुक्तथा॥७॥रविर्दशांशोहिमरश्मिषोडशेबुधतृतीये
कुजअष्टभागे॥शनिश्चरेद्वादशभागहारोनभागहारेग
रुशुक्रवारः॥८॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com